## ३८ अष्टात्रिंश दशकः - चित्तशुद्धि प्राधान्यम्

अन्तर्मुखो यः स्वशुभेच्छयैव स्वयं विमर्शेन मनोमलानि ।
दृष्ट्वा शमाद्यै र्धुनुते समूलं स भाग्यवान्देवि तव प्रियश्च ॥ ३८-१॥

न वेदशास्त्रा ध्ययनेन तीर्थ - संसेवया दान तपो व्रतैर्वा ।
शुद्धिं मनो याति तव स्मृतेस्तत् वैशद्य मादर्शव देति मातः ॥ ३८-२॥

शुद्धिर्न यज्ञेन यजन् शशाङ्कः पत्नीं गुरोः प्राप भृशं स्मरार्तः ।
शतक्रतु र्गौतम धर्मपत्नीं अगादहल्यां मदनेषु विद्धः ॥ ३८-३॥

स विघ्नकारी तपसां मुनीनां गतस्पृहं योगिवरं प्रशान्तम् ।
हा विश्वरूपं पविना जघान न किञ्च नाकार्य मधर्म बुद्धेः ॥ ३८-४॥

मुनि र्वसिष्ठः खलु तीर्थसेवी तपोनिधि र्गाधिसुतश्च कोपात् ।
उभौ मिथः शेपतुराडिभावं प्राप्तः किलैको बकतां परश्च ॥ ३८-५॥

धनानि पृष्टानि गुरून दातृन् स्वान् भार्गवान् पुत्र कलत्र भाजः ।
क्रुद्धाः परं हैहय भूमिपाला न्यपीडयन् कोऽत्र विशुद्ध चित्तः ॥ ३८-६॥

कुर्यान्न किं लोभहतो मनुष्यो युधिष्ठिराद्या अपि धर्मनिष्ठाः ।
पितामहं बन्धुजनान् गुरूंश्च रणे निजघ्नुः खलु राज्य लोभात् ॥ ३८-७॥

कृष्णोपदिष्टो जनमेजयस्तु शुद्धान्तरङ्गः पितरं मखेन ।
परीक्षितं पाप विमुक्त मार्यं विधाय ते प्रापयतिस्म लोकम् ॥ ३८-८॥

सदा सदाचार रतो विविक्ते देशे निषण्ण श्चरणाम्बुजे ते ।
ध्याय न्नजस्रं निजवासना यो निर्मार्ष्टि स त्वन्मयता मुपैति ॥ ३८-९॥

ज्ञानं न भक्तिर्न तपो न योग - बुद्धिर्न मे चित्त जयोऽपि मातः ।
अन्धं तमोऽहं प्रविशामि मृत्योः समुद्धरेमं वरदे नमस्ते ॥ ३८-१०॥